**अनुधावन** न० अनु+धाव—ल्युट्। पश्चाद्गमने, तत्त्वनिश्चयायानुसरणे, अनुसन्धाने च। [आसक्तौ च।

**अनुध्या** स्त्री अनु+ध्यै—अङ्। शुभानुचिन्तने, अनुग्रहे,

**अनुध्यान** न० अनु+ध्यै—ल्युट्। अनुक्षणचिन्तने "या नः प्रीतिर्विरूपाक्ष! त्वदनुध्यानसम्भवेति" कुमा०।

**अनुध्याय** पु० अनु+ध्यै—कर्त्तरि घञ्। अनुचिन्तके शुभानुचिन्तके। "बालस्याशक्तस्य वा तदनुध्यायुमनसेति" प्रा०त० स्मृतिः।

**अनुध्येय** त्रि० अनु+ध्यै—कर्म्मणि यत्। अनुग्राह्ये यदीयशुभानुचिन्तनं क्रियते तस्मिन्। "अनुदध्युरनुध्येयं सान्निध्यैः प्रतिमागतैरिति" रघुः।

**अनुनय** पु० अनु+नी+अच्। विनये, प्रणिपाते, प्रार्थने, सान्त्वने च। "कथं नु? शक्योऽनुनयोमहर्षेर्विश्राणनाच्चान्यपयस्विनीनामिति" रघुः। [अनुरूपशब्दे।

**अनुनाद** पु० अनुरूपोऽनादः प्रा०स०। प्रतिध्वनौ प्रतिशब्दे

**अनुनादिन्** त्रि० अनु+नदति अनु+नद—णिनि। प्रतिरूपशब्दकारके "गम्भीरेणानुनादिनेति" रामा०।

**अनुनायिका** स्त्री अनुगता नायिकाम्। नायिकानुगतायाम् "सखी प्रव्रजिता दासी प्रेष्या धात्रेयिका तथा। अन्याश्च शिल्पकारिण्यो विज्ञेया ह्यनुनायिका" इत्युक्तदास्यादौ।

**अनुनाश** पु० अनु+नश—घञ्। अनुमरणे। अदूरदेशाद्यर्थे सङ्काशादि० ण्य आनुनाश्यः तददूरदेशादौ त्रि०।

**अनुनासिक** त्रि० अनुगतो नासिकाम् अत्या०स०। नासिकया सह स्वस्थानेनोच्चार्य्यमाणेषु वर्णभेदेषु। ते च "अमोऽनुनासिका न ह्रौ" इति शिक्षायां दर्शिताः हकाररकारभिन्नाः अम्प्रत्याहारान्तर्गताः वर्णाः। "मुखनासिकावचनोऽनुनासिक" इति पाणिन्युक्तेस्तेषां तत्तत्स्थानसहितनासिकयोच्चार्य्यमाणत्वात्तत्त्वम् "उपदेशेऽजनुनासिक" इति पा०। अम्प्रत्याहारमध्ये रभिन्ना यवलाः निरनुनासिकाः सानुनासिकाश्च तत्रानुनासिकस्थाने उत्पन्नयवलानामेव सानुनासिकत्वम् "यलोद्विधाऽरो निरनुनासिकः सानुनासिकः। अमोऽननासिकस्तेन तत्स्थाने सानुनासिक" इत्यभियुक्तोक्तेः यथा यय्यँन्यते विद्वाल्लिँखति, सव्व्तँसरः अन्ये निरनुनासिकाः। वेत्यनुवृत्तौ "अणोऽप्रगृह्यस्यानुनासिक" इति पाणिन्युक्तेरप्रगृह्या एवाणोऽनुनासिकाः।

**अनुनीत** त्रि० अनु+नी—क्त। कृतानुनये यस्य सान्त्वनार्थं विनयादिकं क्रियते तस्मिन्। "स चानुनीतोऽपि भृशं चुकोपेति" भारतम्।

**अनुनेय** त्रि० अनु+नी—कर्मणि यत्। अनुनयकरणार्हे, अनुनेतुं योग्ये च।

**अनुपकार** पु० न उपकारः अभावार्थे न०त०। उपकाराभावे विरोधे न०त०। अपकारे। [स्त्रियां ङीप्।

**अनुपकारिन्** त्रि० न उपकारी विरोधे न०त०। अपकारिणि

**अनुपचित** त्रि० उप+चि—क्त वेदे निष्ठातस्य न नत्वम् न०त०। अनुपक्षीणे। "सुवीर्य्यं वर्षिष्ठमनुपचितम् ऋ० ३,१३,७ अनुपचितम् "अनुपक्षीणमिति" भा०। लोके तु अनुपक्षीणः त्रि०।

**अनुपठित** न० अनु+पठ—भावे क्त। गुरुमुखपाठानुसारिपाठे अनुपठितमनेन इष्टादि० इनि। अनुपठिती कृतानुपाठे त्रि० स्त्रियां ङीप्। [पतने च।

**अनुपतन** न० अनु+पत—ल्युट्। अनुकूलपतने, अनुरूप-

**अनुपति** अव्य० पत्युः सामीप्यम् अव्ययी०। पतिसमीपे। "अनुपति पत्नीरुत्तर उत्तर" इति कात्या० १२,२,१६, दीक्षाकर्त्ता पतिसमीपे तत्पत्नीः दीक्षयतीति तद्व्याख्या।

**अनुपथ** पु० अनुकूलः पन्थाः अच् समा०। अनुकूलमार्गे "अन्नस्यथा अनुपथा" इति ऋ० ५,५२,१०, अनुपथाः अनुकूलमार्गा" इति भा०। पथःसमीपे पथि वा अव्ययी०। पथिसमीपे पथीत्यर्थे वा अव्य०। परिमुखा० ञ्य। आनुपथ्यम् पथिभवादौ त्रि०।

**अनुपद** न० अनुरूपं पदम् प्रा०समा०। अनुकूलपदे अनुरूपस्थाने "आशिषामनुपदमिति" "अर्घानुपदमाशिष" इति च रघुः। पदस्य पश्चात् अव्ययी०। पदस्य पश्चादित्यर्थे पश्चाद्गमने च। भवादौ परिमुखा० ञ्य आनुपद्यः तत्र भवादौ त्रि०। सुप्तिङन्तं पदं तत्सदृशं ग्रन्थमधीते वेत्ति वा उक्था० ठक्। आनुपदिकः तदध्येतरि तद्वेत्तरि च त्रि०।

**अनुपद्** न० अनुपद्यते प्रतिदिनं लभ्यते अनु+पद—क्विप्। प्रतिदिनलभ्येऽन्ने। "अनुपदस्यानुपदे त्वा" य० १५,८, "प्रतिदिनमनुपद्यतेऽनुपदन्नमिति" वेददीपः।

**अनुपदिक** त्रि० अनुपदमस्त्यस्य गन्तृत्वेन ठन्। पश्चाद्गते

**अनुपदिन्** अनुपदमन्वेष्टा अनुपद+इनि। अनुपदम् अन्वेष्टरि (अन्वेषणकर्त्तरि) "अनुपद्यन्वेष्टेति" पा० "मृगस्यानुपदी रामो जगाम गजविक्रम" इति भट्टिः।

**अनुपदिष्ट** त्रि० उप+दिश—क्त न०त०। उपदेशाकर्म्मणि।

**अनुपदीना** स्त्री अनु, पदस्य आयामतुल्यायामः आयामेऽव्ययी० अनुपदं बद्धेत्यर्थे ख। पादतुल्यायामवत्यां पादबद्धायां पादुकायाम् (मोजा) इत्यादि ख्यातायाम्।